Gyanshauryam, International Scientific Refereed Research Journal
© 2023 GISRRJ | Volume 6 | Issue 2 | ISSN : 2582-0095

# सहयोगात्मकाधिगमः

डॉ. आरती शर्मा
सहायकाचार्यः, शिक्षापीठः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय, नवदेहली

**Article Info**
Volume 6, Issue 2
Page Number : 76-79

**Publication Issue :**
March-April-2023

**Article History**
Accepted : 01 April 2023
Published : 10 April 2023

**शोधसार:** (Abstract)- मानवः संसारेऽस्मिन् परस्परसहयोगेनैव व्यवहरति। मानवसमाजस्यास्तित्त्वमेव तस्य सहयोगिनः एव संभवं कृतमस्ति। अनेन न केवलम् एकः जनः अपितु सम्पूर्णसमूहः लाभान्वितः भवति। सहयोगे सर्वे छात्राः एकं समानं लक्ष्यं प्राप्यर्थं मिलित्त्वा प्रयासं कुर्वन्ति। सहयोगः एकस्य व्यक्तित्त्वस्य विशेषकः भवति। लक्ष्यसंरचनायां छात्राः सहयोग विशेषकं स्वीयानुक्रियायां प्रदर्शयन्ति। एवं प्रकारेण सर्वे छात्राः सहयोगात्मकाधिगमेन स्वीय ज्ञानमभिवर्धयन्ति। वस्तुतः सहयोगात्मकाधिगमः एकप्रकारकम् अधिगमोपागमः अस्ति, यस्मिन् लघु समूहेषु छात्राः परस्परं अधिगमे साहाय्यं कुर्वन्ति। सामान्यरूपेण सहयोगः अधिगमस्य कृते व्यापकसमूहसंरचना विद्यते। व्यापक समूह संरचनायां लक्ष्यस्य प्रकृतिः, लक्ष्यप्राप्त्यर्थं योजितानां विभिन्नकार्याणां महत्त्वं, कार्ये सहभागिताप्रदातृणां सदस्यानां मध्ये अन्तःक्रिया, भाषा एवं प्रकृतिः सदस्यानाञ्च मध्ये अन्तःनिर्भरता सम्मिलिताः भवन्ति। तर्हि सहयोगात्मकाधिगमस्य उद्भवः कदा सञ्जातम्, अस्य सैद्धान्तिक पृष्ठभूमिः का वर्तते, अस्य घटकानि कानि, विधयः के इत्यादि बिन्दूनामुपरि विचारः शोधलेखेऽस्मिन् करिष्यते।

**मुख्यशब्दाः**- सहयोगात्मकाधिगमः, मानवः, छात्राः, सहयोगिनः।

**विषय प्रवेशः** – सहयोगात्मकाधिगमः अधिगमेन सम्बन्धितमस्ति, यत्र छात्राः स्वयं भागं ग्रह्यान्ति एवञ्च लक्ष्यप्राप्त्यर्थं प्रयतन्ते। अस्मिन् छात्राः परस्परं मिलित्वा कार्यं कुर्वन्ति अधिगच्छन्ति च।

"Cooperative learning is an educational approach which aims to organize classroom activities into academic and social learning experiences. There is much more to Cooperative learning than merely arranging students into groups and it has been described as structuring positive interdependence."

जॉनसन महोदयानुसारेण – "सहयोगात्मकाधिगमः लघुसमूहेषु प्रयुज्यमाना अनुदेशनात्मिका तकनीकी विद्यते, यस्मिन् छात्राः परस्परं कार्यं कुर्वन्तः अधिगच्छन्ति।

सहयोगात्मकाधिगमे लक्ष्येन सह साम्यताकारणेन समूहस्य सर्वे सदस्याः परस्परं सहयोगेन योजिताः तिष्ठत्ति।

**सहयोगात्मकाधिगमस्योद्भवः** - सम्पूर्ण विश्वे शिक्षायाः क्षेत्रे निरन्तरं नवपरिवर्तनानां केन्द्र बिन्दुः कक्षा–कक्ष प्रक्रिया एव भवति। वर्तमान शैक्षिक पद्धत्या 'शिक्षा सर्वेषाम्' इति नियोजनं क्रियते। छात्राः परस्परं प्रतियोगी भावनया स्वीयां स्थितिम् उच्चतरं कर्तुं प्रयतन्ते परन्तु अनया भावनया तेषु मैत्री भावनायाः अभावः दरीदृश्यते, अतः सहयोगात्मकाधिगमस्य उद्भवः सञ्जातम्। सहैव सम्पूर्ण कक्षाऽनुदेशने प्रत्येकस्य छात्रस्योपरि व्यक्तिशः ध्यानं दातुं न शक्यते। सम्पूर्ण कक्षाऽधिगमे

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

व्यक्तिगतविभिन्नता: दृष्टुमशक्या: भवन्ति। व्यक्तिगतानुदेशनं यथा – अभिक्रमितानुदेशन, साधिकाराधिगम: अध्यापकस्य कार्यभारे वृद्धिं कुर्वन्ति। अधिककाल-संसाधन एवं शिक्षकाणामभावे व्यक्तिगताऽनुदेशनं कक्ष्यायां न सम्भवति। परिणामस्वरूपं परम्परागत सम्पूर्ण कक्षाऽनुदेशने परिवर्तनमागतम्। तत्रापि ज्ञातं यत् प्रतियोगितात्मकाधिगमेन छात्रेषु नकारात्मकान्तनिर्भरता जन्मं प्राप्नोति। स्लैविनमहोदयेन शोधेभ्य: ज्ञातं यत् प्रतियोगिता छात्रेभ्य: परस्परं साहाय्यार्थं हतोत्साहितं करोति। प्रतियोगिता समाजीकरणसिद्धान्तस्य विपरीतमस्ति। एवं प्रकारेण समूहानुदेशनेन लघुसमूहानुदेशनं एवं प्रतियोगितया च सहयोगं प्रति परिवर्तनस्वीकरणतर्कं बलं प्राप्तम् अर्थात् सहयोगात्मकाधिगमस्य उद्भव: जातम्। अधिगमस्य कोरद्वयं व्यक्तिगताधिगम: समूहाधिगमश्च अतिवादी विचारद्वयं वर्तते। अतिवादं परित्यज्य मध्यम मार्ग: समूहाधिगम: विद्यते, यत् सहयोगात्मकाधिगमं प्रति नयति।

**सहयोगात्मकाधिगमस्य सैद्धान्तिक पृष्ठभूमि:-** सहयोगात्मकाधिगमं समर्थनं बलञ्च विभिन्न सैद्धान्तिकपृष्ठभूमिभ्य: प्राप्तम्। अस्य पृष्ठे मुख्य सैद्धान्तिक परिप्रेक्ष्याणि यथा विकासात्मक- समंजन-सामाजिक-अभिप्रेरणात्मक- अधिगम सिद्धान्त: इत्यादि सन्ति।

**विकासात्मकपरिप्रेक्ष्यम् -** प्याजे एवं वाइगोत्सकी महोदयानां विचाराणामाधारेण विकासात्मक सिद्धान्तस्य विकास: अभवत्। वाइगोत्सकी महोदयेन समीपताविकासस्य क्षेत्रस्य (Zone of Proximate Development) अवधारणां जन्मऽददत्। अनयाऽवधारणया तात्पर्यमस्ति – वास्तविकं विकासस्य स्तर एवं स्वयं द्वारा समस्याया: समाधानं कृत्वा सम्भाव्य विकासस्य स्तरस्य मध्ये अन्तरालेनास्ति। तथापि अधिगमकर्ता कस्यापि वयस्कव्यक्ते: निर्देशने एव कार्यं करोति। तस्य समीपताविकासस्य क्षेत्रम् एकेन मानवेन बिना कस्यापि साहाय्येन स्वयं एवं ज्ञानयुक्त व्यक्ते: सम्पर्कं स्थित्वा कार्यस्य मध्ये भेदाऽभिज्ञानमस्ति।

"What a child can do today in Co-operation tomorrow he will be able to do on his own."

एक: छात्र: य: एकं कार्यमद्य अन्यव्यक्तीनां सहयोगेन कर्तुं शक्नोति, स्व: स: तद् कार्यं स्वयं कर्तुं पारयिष्यति।

सहयोगात्मक गतिविधय: बालकेषु अभिवृद्धिं जन्म ददति। समानवयस: बालका: परस्परं विकास क्षेत्रे क्रियाशीला: भवन्ति। अस्मिन आदौ प्रकार्याणि समूहरूपेण क्रियन्ते, तत: तानि बालकानां मध्ये सम्बन्धानां रूपं धारयन्ति। तत्पश्चात् ते व्यक्ते: मानसिक प्रकार्याणि भवन्ति।

**सामाजिकसमञ्जनपरिप्रेक्ष्यम् -** अस्या: विचारधाराया: समर्थकानां मतमस्ति यत् सहयोगात्मकाधिगमविधिषु समूहस्य समञ्जनकारणेनैव उपलब्धौ उन्नयनं भवति। समूहस्य सर्वे सदस्या: परस्परं सर्वेषां समूहसदस्यानां ध्यानं यच्छन्ति, साफल्यञ्च वाञ्छन्ति। सहयोगात्माधिगमस्य सन्नद्धता हेतु दलनिर्माणक्रियाणामुपरि बलं देयम्। एता: क्रिया: समूहस्य सदस्येषु ऐक्यभावनां विकासयन्ति। अन्ततोगत्वा अन्यव्यक्तीनां रक्षणमपि ज्ञास्यन्ति। यदा बाला: परस्परं ध्यानं यच्छन्ति, तर्हि न केवलं विभिन्नप्रत्ययनामधिगमे साहाय्यं कुर्वन्ति अपितु परस्परमधिगन्तुमुपलब्ध्यर्थञ्च प्रेरयन्ति। सहयोगात्माधिगमेन समूहसदस्येषु अन्तर्निर्भरता विकसिता भवति।

**अभिप्रेरणात्मकपरिप्रेक्ष्यम् -**

अभिप्रेरणात्मक परिप्रेक्ष्ये मुख्यरूपेण समूहसंरचना एवं पुरस्कारोपरि क्रियते, यस्मिन् समूह: कार्यं करोति। समूहसंरचना मुख्यत: त्रिधा प्रतियोगात्मिका, वैयक्तिकी, सहयोगात्मिका च प्राप्यते। सहयोगात्मक पुरस्कार संरचनायां समूहस्य सदस्येभ्य: स्वीयवैयक्तिक लक्ष्यं प्रति गन्तुं समूहस्य साफल्यमावश्यकं भवति। समूहस्य सर्वे सदस्या: लक्ष्यकेन्द्रितव्यवहारसमूहं पारितोषिकं प्रदास्यति। सर्वेषु सहयोगात्मकाधिगमसिद्धान्तेषु सहयोगात्मककार्याणां प्रयोग: क्रियते। अभिप्रेरणात्मक परिप्रेक्ष्यस्य समर्थका: सहयोगात्मकाधिगमस्य प्रभावस्य प्रभावशीलता सहयोगात्मक पुरस्कार संगठनस्य सन्दर्भे

प्रत्यक्षीकृतं कुर्वन्ति। अभिप्रेरणात्मकपरिप्रेक्ष्ये पुरस्कारसंगठनमत्यावश्यकमस्ति। सहयोगात्मक पुरस्कारसंरचना समवयस्कानां कृते मानकानां (Peer Norms) निर्माणं करोति एवं व्यक्तिगत प्रयासेभ्य: संरक्षणं प्रददाति।

अधिगमसिद्धान्तपरिप्रेक्ष्यम् – स्लेविन महोदयानुसारेण सहयोगात्मकाधिगमव्यूहरचना कक्षासङ्घटनेभ्य: द्विधा भिन्नमस्ति। कार्य संरचना – सहयोगात्मक कार्य संगठने छात्रेभ्य: समूह कार्यं कुर्वन्त: परस्परं प्रोत्साहितं करणीयं भवति। सर्वेषां छात्राणां योगदानमेव वैयक्तिक योगदानं सुनिश्चितं करोति। समूहपुरस्कार: सर्वेषां सदस्यानां कृते प्रेरकस्य कार्यं करोति।

वीटले महोदयानुसारेण सहयोगात्मकाधिगम: द्विऽधिनियमेषु आधारितमस्ति–

(i) ज्ञानं निष्क्रियो भूत्वा प्राप्तुं न शक्यते। जनेन सक्रियो भूत्वा एव प्राप्यते उत वा निर्मीयते। (ii) संज्ञानस्य कार्यं अनुकूलनकरणमस्ति। अयं जनं अनुभवात्मकसंस्कारान् सङ्घटयितुं साहाय्यं करोति।

प्याजे महोदयानुसारेण ज्ञानप्राप्तेरनन्तरं तस्मिन्नोपरि मानसिक एवं शारीरिकरूपेण कार्यं करणीयं भवति। सामाजिक अन्त:क्रिया ज्ञानस्य संरचनायां वृद्धिं करोति। सहयोगात्मकाधिगमे कक्षा तद् स्थानमस्ति, यत्र सक्रियात्मक चर्चा: भवन्ति एवं अध्यापक: अधिगमस्य सुगमकर्त्तारूपेण कार्यं करोति। स: केवलं सूचनानां स्रोत: एव न भवति।

सहयोगात्मकाधिगमस्य घटकानि –

सहयोगात्मकाधिगमस्य घटकानि – एतानि अति–

- सकारात्मकाऽन्तर्निर्भरता
- सकारात्मकोद्देश्यनिर्भरता
- सकारात्मकपुरस्कार:
- सकारात्मकसंसाधनान्तनिर्भरता
- सकारात्मकभूमिकाऽन्तनिर्भरता
- सकारात्मककार्यनिर्भरता
- व्यक्तिगतयोगदानम्
- अन्तर्वैयक्तिककौशलम्
- समूहप्रक्रमणम्
- परस्परमन्त:क्रिया:

घटकानां नाम्ना एव तेषु अन्तर्निहित भाव: ज्ञातुं शक्यते। यथा यदा एकस्य समूहस्य लक्ष्येषु समानता अथवा समूहमध्ये स्थित्वा अभिज्ञानस्य भावना भवति, तर्हि सकारात्मकान्तनिर्भरता जन्म प्राप्नोति। अधिगमसमूह: केवलम् अधिगमोद्देश्यानां कारणेनैव परस्परं योजितं भवति। पुरस्कारेण समूहसदस्येषु उत्साह: जायते। समूहस्य लक्ष्याणां प्रात्यर्थं सर्वेषां संसाधनानां, सूचनानां सामग्रीणाञ्च मिलित्वा प्रयोग: करणीयं भवति। अध्यापक: समूहमध्ये छात्रेषु विविध भूमिकानां सृजनं करोति। यथा– पाठक: (Reader), अधिगम निरीक्षक: (Checker of understanding), सहभागित्त्व प्रोत्साहक: (Encourager of participation), ज्ञानविस्तारक: (Elaborator of knowledge) इत्यादया:। एवं प्रकारेण समूहे सर्वै: वैयक्तिकं योगदानं करणीयं भवति।

कस्यापि समूहं सहयोगात्मकसमूहरूपेण निर्मातुं नेतृत्वं, निर्णयनं, विश्वास:, सम्प्रेषणं, प्रबन्धनकौशलानाञ्च विकासकरणमावश्यकं भवति। समूह प्रक्रमणे समूहस्य सर्वेषां सदस्यानां कार्यकलापानामुपरि विचारविमर्श: क्रियते, यत् तथैव

कार्यमग्रेसारणीयमथवा किञ्चित् परिवर्तनं करणीयम्। परस्परमन्त: क्रिया इत्युक्ते सदस्यानां मध्ये सम्मुखे उत्साहिता: अन्त:क्रिया: सकारात्मकान्तनिर्भरता, सामाजिक कुशलता एवं मनोवैज्ञानिक समायोजनेन उद्धाविता भवति।

**सहयोगात्मकाधिगमविधय**: - सहयोगात्मकाधिगमविधीनानां नामानि, तेषां विधीनां जनका: –

| विधे: नाम | जनक: |
|---|---|
| 1 Learning together and alone | जॉनसन एवं जॉनसन |
| 2 Teams Games Tournaments (TGT) | डीवरीज एवं एडवर्डस |
| 3 Group Investigation | शारन एवं शारन |
| 4 Constructive Controversy | जॉनसन एवं जॉनसन |
| 5 Jigsaw | अरोनस एस तस्य सहयोगिन: |
| 6 Student Team's Achievements (STAD) | स्लेविन एवं तस्य सहयोगिन: |
| 7 Complex Instruction | कोहेन |
| 8 Team Associated Instructure (TAI) | स्लेविन एवं तस्य सहयोगिन: |
| 9 Co-operative Learning Structures | कारगन |
| 10 Co-operative Learning Reading and Writing | स्टीवनस, स्लेविन एवं तस्य सहयोगिन: |

**सारांश**: – सहयोगात्मकाधिगम: एका सफला अधिगमव्यूहरचनाऽस्ति, यस्मिन् छात्र: लघु समूहे स्थित्त्वा स्वीय योग्यतास्तराणामाधारेण विविधाधिगमक्रियाभ्य: विषयमवगच्छन्ति। समूहस्य प्रत्येकं सदस्य: केवलं स्वीयाधिगमाय उत्तरदायि न भवति, अपितु स्वीय समूहस्य सदस्यानामधिगमे, अधिगमसाहाय्ये एवम् अधिगमस्य वातावरण सृजने अपि भवति। सदस्यानां सहयोगात्मक प्रयासा: समान लक्ष्याणां प्राप्तौ सहायका: भवन्ति। सहयोगात्मकाधिगम: स्व-सम्मान भावनां जन्म ददाति। छात्रेषु एनां भावनामुदेति यत् प्रत्येकं व्यक्ति: महत्त्वपूर्णमस्ति। साररूपेण सहयोगात्मकाधिगमे निहित सन्देशं हिन्दीभाषायामेवं वक्तुं शक्नुम: –

"मेरी सफलता तुम्हें लाभ देगी, तुम्हारी सफलता मुझे लाभ प्रदान करेगी।
सभी एक साथ डूवेंगे या तैर कर बाहर आ पायेंगे।
एक दूसरे के बिना काम असम्भव है।
एक सदस्य की सफलता को मिल कर मनायें।"

**सन्दर्भ ग्रन्थ सूची-**


1. R.V. Slavin (1995), Co-operative Learning, Theory, Research and practice. Englewood cliffs, N.J.: Prentice hall.
2. M.Deutach (1949), A Theory of Co-operation and Competition, Human Relations
3. J.Ellis ormrod, Educational Psychology. Developing Learners Prentice Hall.
4. Loger T.and David W.Johnson-An Overview of Co-operative Learning, Published in J. Thousand, A.Villa ana A.Nevin (ed). Creative and Collaborative Learning, Brookers Press. Baltimore, 1994,
5. S.Kagan, (1994) Co-operative Learning, san clement, CA; Kagan Publications